# RAMAKRISHNA MISSION VIDYAMANDIRA
(Residential Autonomous College affiliated to University of Calcutta)

**B.A./B.Sc. SIXTH SEMESTER EXAMINATION, MAY 2025**
**THIRD YEAR (BATCH 2022-25)**
**SANSKRIT [HONOURS]**
**Paper : DSE 3**

Date : 10/05/2025
Time : 11.00 am – 1.00 pm
Full Marks : 50

1. यथेच्छं प्रश्नद्वयं समाधेयम्। [2×10]
   क) मम्मटनिरूपिते काव्यलक्षणे प्रयुक्तस्य 'सगुणौ' इति पदस्य अनावश्यकता विश्वनाथमतमनुसृत्य विचार्यताम्।
   ख) 'चतुर्वर्गफलप्राप्तिः सुखादल्पधियामपि काव्यादेव' – उक्तेरस्या अभिप्रायः पर्यालोच्यताम्।
   ग) 'वाक्यं रसात्मकं काव्यम्' - व्याख्यायताम्।
   घ) विश्वनाथकविराजं तत्कृतसाहित्यदर्पणं चावलम्ब्य नातिदीर्घः प्रबन्धो लेख्यः।
2. यथेच्छं चत्वारः प्रश्नाः समाधेयाः। [4×5]
   क) काव्यस्य शब्दार्थौ शरीरम्, रसादिश्चात्मा, गुणाः शौर्यादिवत्, दोषाः काणत्वादिवत्, रीतयोऽवयवसंस्थानविशेषवत्, अलङ्काराश्च कटककुण्डलादिवत् इत्यस्य तात्पर्यम् आलोच्यताम्।
   ख) एतेन वक्रोक्तिः काव्यजीवितम् — इति वक्रोक्तिजीवितकारोक्तमपि परास्तम्, वक्रोक्तेरलंकाररूपत्वात्। – इत्यस्य तात्पर्यम् आलोच्यताम्।
   ग) एतेन 'अनलङ्कृती पुनः क्वापि' इति यदुक्तम्, तदपि परास्तम् इत्यस्य तात्पर्यम् आलोच्यताम्।
   घ) एतेन — अदोषं गुणवत् काव्यमलङ्कारैरलंकृतम्।
   रसान्वितं कविः कुर्वन् कीर्तिं प्रीतिं च विन्दति॥ – इत्यस्य तात्पर्यं लेख्यम्।
   ङ) विश्वनाथकविराजमनुसृत्य रसाभासस्योदाहरणमुपस्थाप्य व्याख्यायताम्।
   च) 'वाग्वैदग्ध्यप्रधानेऽपि रस एवात्र जीवितम्' – तात्पर्यं लेख्यम्।
   छ) साहित्यदर्पणः इति ग्रन्थस्य अनुबन्धचतुष्टयं व्याख्यायताम्।
   ज) विश्वनाथकविराजमनुसृत्य भावस्योदाहरणमुपस्थाप्य व्याख्यायताम्।
3. यथेच्छं पञ्च प्रश्नाः समाधेयाः। [5×2]
   क) साहित्यदर्पणस्य अवान्तरविभागानां नाम किम् ? ते च साकल्येन कति ?
   ख) वक्रोक्तिः काव्यजीवितम् इति कस्य वचनम् ? कुत्र ?
   ग) साहित्यदर्पणग्रन्थस्य काव्यप्रयोजनं लिख्यताम्।
   घ) शब्दार्थौ सहितौ काव्यम् इति कस्य वचनम् ? कुत्र ?
   ङ) साहित्यदर्पणस्य कस्याश्चित् टीकायास्तत्कर्तुश्च नाम लेख्यम्।
   च) 'साहित्यदर्पणः' इति ग्रन्थस्य मङ्गलाचरणश्लोके कस्य कस्या वा स्तुतिः विहिता ?
   छ) को नाम भावः ?
   ज) अग्निपुराणे काव्यस्य उपादेयताविषये किम् उक्तम् ?
   झ) को नाम दोषः ?
   ञ) 'श्रुतिदुष्टादयो दोषा अनित्या ये च दर्शिताः' – इति केन उक्तम् ?

——————— × ———————